International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 04-07
© 2022 IJSR
www.anantaajournal.com
Received: 04-01-2022
Accepted: 07-02-2022

डॉ0 दुर्गेश झा
पत्रालयश्च–वरदाहा, भाया
अन्धराठाढ़ी, मण्डलम्, मधुबनी, बिहार,
भारत

Corresponding Author:
डॉ0 दुर्गेश झा
पत्रालयश्च–वरदाहा, भाया
अन्धराठाढ़ी, मण्डलम्, मधुबनी, बिहार,
भारत

# शब्दशास्त्रस्य महत्त्वमूपयोगिता च

डॉ0 दुर्गेश झा

**प्रस्तावना**

शब्दज्ञानं विना भाषाया व्यवहारो भवितुं नार्हति। भाषानाम मानवस्य व्यावहारिकी सम्पत्तिः। विना भाषां परस्परं व्यवहारं कर्तुं न शक्यते। अत संक्षेपेणेदं वत्कुम् शक्यते यद् भाषाज्ञानं शब्दज्ञानपूर्वकमेव सम्भाव्यते। शब्दज्ञानञ्च व्याकरणज्ञानमन्तरा न सम्भवति तथा चोक्तम्–

व्याकरणात्पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति।
अर्थात्तत्त्वज्ञानं तत्त्वाज्ञानम् परं श्रेयः।।[1]

अत्रार्थभर्तृसम्मतिरपि–

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।[2]

अभिप्रायसंक्रमार्थो हि यः शब्दोऽस्माभिः स्वीक्रियते स च शब्दो व्यक्तशब्द एव नाव्यक्तशब्द इति नाविदितं प्रेक्षावताम् । तत्र व्यक्तशब्दोऽपि साधुरसाधुभेदाभ्यां द्विविधः। एवं द्विविधे शब्दभेदे जाते साधुशब्दप्रयोग एव शास्त्रीयलौकिकोभयदृष्टया प्रशस्तः। महाभाष्ये भगवान् भाष्कारः पञ्जलिरेव लिलेख यत्–

एकः शब्दः समयग्ज्ञातःसुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति।[3]

महाभाष्ये पस्पशाह्निकेऽपि भगवता पतञ्जलिनोक्तम्–

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले
सोऽन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।।[4]

इदमत्रावधेयं यल्लोकव्यवहारेऽस्माभिर्येशब्दाः प्रतिदिनं प्रतिक्षणं वा प्रयुज्यन्ते, ते शब्दा अपरिमिता विद्यन्ते। एतस्मिंश्चातिमहत्यपरिमिते प्रयोगविषयके शब्दवाङ्मये के शब्दाः साधवः के चासधवः? कथञ्च तेषु साधुत्वासाधुत्वपरिज्ञानमिति सर्वं व्याकरणशास्त्रज्ञानं विना निर्णेतुं न शक्यते। उक्तञ्च वाक्यपदीये श्रीमता भर्तृहरिणा–

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः। [5]

शब्दानां साधुता शिष्टप्रयोगे निहिता। ते शिष्टा अपि देशकालादि भेदेनपरिमितास्तथापरिमिताश्च सन्ति शिष्टप्रयुक्तशब्दाः । एवमुभयोरपरिमितयोः परिमितया च मानवप्रज्ञयाऽपरिमिताशिष्टप्रयोगविषयकरसाधुत्वपरिज्ञानं प्रतिशब्दं कथमपि कर्तुं न शक्यते । एतदर्थकमेव महाभाष्ये महिर्षिणा पतञ्जलिनाऽप्युक्तम्–

अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते–बृहस्पतिरिन्द्राय दिव्यंवर्षसहस्रं शब्दानां श ब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता , इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रंमध्ययनकालो न चान्तं जगाम कि पुनरद्यत्वे? यः सर्वथा चिरं जीवति वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्तां भवति – आगकालेन, स्वाध्यायकालेन प्रवचनकालेन , व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिदपाठः। [6]

**पुनस्तत्रैवाग्रे भाष्यकर एवं ब्रवीति**

कथं तर्हीमे शब्दाः प्रतिपत्तव्या? किञ्चित्सामान्याविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौधान्प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादाः। कश्चिदुत्सर्गः कर्त्तव्यः कश्चिदपवादः। कथञ्जातीयकः पुनरूत्सर्गः कर्त्तव्यः? कथञ्जातीयकोऽपवादः ? सामान्येनोत्सर्गः कर्त्तव्यः। तद्यथा– कर्मण्यण् (3.2) ।

तस्य विशेषेणापवादः। तद्यथा 'आतोऽनुपसर्गे कः, इति। [7]

एतेनेदमायातं यदुत्सर्गापवाद रूपाभ्यां सामान्य विशेष नियमभ्यां शिष्ट प्रयक्तशब्दानां सरलतया पूर्वं ज्ञानमनन्तरं तेषांलोके प्रयोगोजायते। एवं 'यदि शिष्टाः शब्देषु प्रमाणम्, किमष्टाध्याय्या क्रियते' ? इत्याशङ्क्य 'शिष्टपरिज्ञानार्थाऽष्टाध्यायी ' इति भगवता पतञ्जलिना प्रतिपादितम्। भर्तृहरिणाप्युक्तं वाक्यपदीये–

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्।। [8]

इत्थं व्याकरणेन संस्कृतशब्दानां प्रकृतिप्रत्ययस्वरवर्णमात्रादि – ज्ञानपूर्वक साधुत्वं ज्ञाप्यते। ततस्तेषां साधुशब्दानां लोके भाषायामस्माभिः प्रयोगः क्रियते।

भाषा नाम मनुष्यस्य सामाजिको धर्मः। भाषामध्यमेनैव मानवसमुदायः स्वीयं निखिलं सामाजिकं संश्लेषमाविष्करोति।वक्ता स्वकीयान् भावानर्थांश्च प्रकटयितुं वाक्यानि निर्माति। तत्र वाक्यनिर्माणे भवति वक्तुः स्वातन्त्रयम् किन्तु वाक्ये प्रयुक्तानां शब्दानां साधुत्वनिश्चे स्वातन्त्र्यं नास्ति तत्र साधुत्वनियामकं व्याकरणमेवेतीयता प्रबन्धेन प्रमाणितम्।

एवंविधस्य व्याकरणस्य प्रथमोपदेष्टा कः? इति जिज्ञासायामपौरुषेयार्षाग्रन्थेषु सम्प्राप्तं यत् प्रमाणम्, तदनुसारं संस्कृतव्याकरणस्य प्रथमोपदेष्टा सर्वविद्यानिधानो ब्रह्मा आसीदिति निश्चीयते। अत्र प्रमाणं यथा–

ब्रह्मा बृहस्पतये प्रोवाच, बृस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राम्हणेभ्यः। [9]

कृष्णद्वैपायनो व्यासोऽपि महाभारते प्राह–

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।। [10]

अतः परं ब्रह्मणोपदिष्टा बृहस्पतिश्च द्वितीयः प्रवक्ता बभूव। तेन बृहस्पतिना समुपदिष्टः कश्यपमहर्षेरात्मजश्चन्द्रदेवस्तत्रतयं काठिन्यं विचार्य प्रकृतिप्रत्ययविभागगर्भस्य व्याकरणस्य प्रथमः संस्कर्ताऽभवत् । तद्यथा–

वाग्वै पराच्य व्याकृताऽदत्। ते देवा इन्द्रमब्रुवन । इमां नो वाचं व्याकुर्विति।
तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। [11]
तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्। [12]

इदञ्चैन्द्र व्याकरणं सर्वषु व्याकरेणषु प्राचीनतमम्। इतराणि खलु सर्वाण्यपि व्याकरणानि तस्मादर्वाक्तनानीति वोपदेवकृतकविकल्पद्रुमाख्यस्य ग्रन्थस्यादावेवोक्तम्–

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनन्द्रा जयन्तष्टादिशाब्दिकाः।।

यद्यप्यैन्द्रं व्याकरणं सम्प्रति दुर्लभं तथाप्येतस्य बहुत्र नाम प्रयुक्तमुपलभ्यते। महर्षिः पाणिनिस्तु स्वप्राग्वर्तिनां समेषामाचार्याणां व्याकरणशास्त्रं सर्वतोभावनेऽऽलोड्य ' विद्याकामः शिवं जपेत्' इति वचनमनुसृत्य शिवञ्च समाराध्य शिवप्रसादाच्चतुर्दशसूत्राणि समधिगम्याष्टाध्यायी विनिर्मितवान्।

अस्मिन् जगति केवलं संस्कृतभाषैवैतादृशी भाषा वर्तते, यस्या व्याकरणं सर्वतोभावेन परिपूर्णं परिष्कृतञ्चावलोक्यते। यद्यपि संस्कृतभाषाया अपि प्राचीनानि नवीनानि चानेकानि सन्ति व्याकरणानि किन्तु महर्षिपाणिनिप्रणीतं पाणिनीयं व्याकरणमेवेदानीं यावद् विरचितेषु व्याकरेणषु सर्वश्रेष्ठ लब्धप्रतिष्ठिञ्च विद्यत इति सर्वैर्विद्वद्भिराधुनिकैर्वैज्ञानिकैश्च निर्विवादं स्वीक्रियते। व्याख्योपव्याख्याटीका – टिप्पणयादिरूपेण यावानस्य विस्तरो न तथान्यस्य कस्यापि व्याकरणस्येति समे जानन्त्येव। किं बहुनाऽद्यापि सहस्त्राधिका ग्रन्थाः पाणिनीयव्याकरणमाश्रित्य विरचिता विलोक्यन्ते।

आचार्यः पाणिनिर्न केवलं शब्दशास्त्रज्ञोऽपि तु निखिले प्राचीन–वाङ्मयेऽपि तस्याप्रतिहता गतिरासीत्। तथा च न केवलं वैदिकवाङ्मयस्यापि तु स भूगोलेतिहासपुराणसमुद्रशास्त्रलोक–व्यवहाराद्यनेकशास्त्रणामप्यद्वितीयो विद्वानासीत्। अत एव पाणिनेः

शब्दानुशासनं न केवलं शब्दज्ञानायापि तु प्राचीनभूगोलेतिहासादिज्ञानायापि सर्वोत्कृष्टं साधनमित्याधुनिकैरपीदानीं मुक्तकण्ठं स्वीक्रियते। महर्षिपाणिनिविषये स्वयं भगवान् पतञ्जलिराह– प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्रांमुखे उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम, किं पुनरियता सूत्रेण। [13] पुनश्चाग्रे महर्षिणा पतञ्जलिनोक्तम्–

सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनथकं स्यात्। [14]

जयादित्योऽपि ' उदक्च विपाश; [15] इत्यस्य वृतौ लिखति 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य ' इति।
द्वादशशताब्द्यामुत्पन्नः ऋग्वेदस्य भाष्यकारो वेंकटमाधवोऽपि एवमाह–

शाकल्यः पाणिनिर्यास्क इत्यृगर्थपरास्त्रयः। [16]

एवं विधशास्त्रमर्मज्ञेय पाणिन वैदिक शब्दानां निप्पत्त्यर्थं वैदिकेषु शब्देषु स्वरज्ञानार्थ स्वररस्य सूक्ष्म विवेचनार्थञ्च प्रायः चतुः शतं सूत्राणि प्रणीतानि ।
यतो हि वेदार्थज्ञाने स्वरज्ञानं सर्वथाऽऽवश्यकम्। एतेन महर्षिपाणिनर्वेदज्ञता सर्वथा प्रमाणिता।
'ब्राह्मणेन निष्कारणो धर्मः षडङगोवेदोध्येयोक्षेयश्चेति ।प्रधाननञ्च षडेंषु व्याकरणम्' इति महाभाष्ये पस्पशाह्निके आदावेव महर्षिणा पतञ्जलिनोक्तम्। वेदांगेषु व्याकरणस्य प्रथमं स्थानमिति सर्वेऽपि जानन्त्येव। निरूक्तस्यादौ यास्केनोक्तं यत् 'अतिप्राचीनकाले वेदांगान्यपि ऋषिभिः प्रणीतानि । एतेन वेदांगान्यप्यतिप्राचीनानीत्यत्र नास्ति सन्देहावसरः । महाभारतेऽपि भगवता व्यासेन लिखितं यत्– 'शिवबृहस्पती वेदांगानामादिप्रवर्त्तकावास्ताम्' इति मुण्डकोनिषदः प्रारम्भे महर्षिरांरिसः षडांनीति शौनकमाह–

शिक्षा कल्पो व्याकरणं निरूक्तं छन्दो ज्योतिषम्।

अन्यच्च शाकलप्रातिशाख्ये–

शिक्षा कल्पोऽथ व्याकरणं निरूक्तं छन्दसां च यः।
ज्योतिषामयनञ्चैव वेदांगानि षडेव तु।। [17]

**पाणिनीयशिक्षायामपि चोक्तम्**

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते। [18]

छान्दोग्योपनिषद्भाष्ये भगवाञ्छंकराचार्य : वेदानां वेद; ' इत्यस्यार्थ व्याकरणमिति चकार।
एतेन भगवच्छंकराचार्यकृत भाष्यपरिशीलनेन व्याकरणस्य महत्त्वविषये किञ्चिद्वक्तव्यं नावशिष्यते। वेदाध्ययने तु सर्वतोभावेन व्याकरणस्योपयोग इत्यपि छान्दोग्योपनिषद्भाष्यवलोकनेनैव प्रमाणितम्।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्तष्टादिशाब्दिका।। [19]

इति वोपदेवकृतकविकल्पद्रुमाख्यग्रन्थोक्तवचनप्रामाण्येन वैयाकरणसम्प्रदाये प्रसिद्धा अष्टौ शाब्दिका अभूवन्निति सर्वेरपि शाब्दिकसम्प्रदायाग्रण्यैर्मनीषिभिः स्वीक्रियते। तत्राप्येतेष्वष्टविधेषु व्याकरणेषु ऐन्द्रव्याकरणमतिविशालमासीदित्य – पीतिहासविद्भिर्विद्व–द्भिस्तत्र तत्र ग्रन्थे महताऽऽडम्बरेण प्रतिपादितम् । महाभाष्यकारेण भगवता पतञ्जलिनापि महाभाष्ये उक्तम्–
एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किं पुनरद्यत्वे यः सर्वथा चिरं जीवतिव वर्षशतं जीवति। [20] किं बहुना, पाणिनीयव्याकरणस्यैतादृशं वैशिष्ट्यं भगवता भाष्यकारेणाचार्येण पतञ्चलिनाऽपि स्वीकृतम्। अत एव व्याकरणाध्ययनप्रयोजनकथनावसरे महाभाष्यस्यादावेव तैरुक्तम्–
कानि पुनः शब्दानुशासनस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। रक्षार्थं वेदानामध्येयं व्याकरणम् लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति। ऊहः खल्वपि न सर्वैलिंगैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः, ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम् आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गों वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षङङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। लघ्वर्थं चाध्येयं व्याकरणम्। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्। असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति– स्थूलपृषतीमाग्निवारुणीमनड्वाही– मालभेतेति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वप्रदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति। [21]

**पुनश्चाग्रे भाष्यकार आह**

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि– तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुंक्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उततवः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवोऽसि वरुणेति। [22]

इत्थं व्याकरणस्य पुनरपि बहुविधानि प्रयोजनानि महर्षिणा पतञ्जलिना निर्दिष्टानि। तेषु स्पष्टप्रतिपत्त्यर्थं निदर्शनरूपेण कानिचिद् विविच्यन्ते। तद्यथा–

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।
दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।

अनेन भाष्यकारवचनप्रामाण्येन दुष्टशब्दप्रयोगे महान् दोषोऽतो दुष्टाः शब्दा न प्रयोक्तव्या इति सुनिश्चितम्। 'इमे शब्दा दुष्टाः' इति ज्ञानं तु व्याकरणज्ञानाधीनमेव। अतो व्याकरणाध्ययनमावश्यकमिति भाष्यकारणामभिप्रायः।

अनेन भाष्यकारवचनप्रामाण्येन दुष्टशब्दप्रयोगे महान् दोषोऽतो दुष्टाः शब्दा न प्रयोक्तव्या इति सुनिश्चितम्। 'इमे शब्दा दुष्टाः' इति ज्ञानं तु व्याकरणज्ञानाधीनमेव। अतो व्याकरणाध्ययनमावश्यकमिति भाष्यकाराणामभिप्रायः।

इदमपि ध्यातव्यं यद् यथा महाभाष्ये महर्षिणा पतञ्जलिना दुष्टशब्द प्रयोगे महान्तो दोषा उक्तास्तथैव साधुशब्दप्रयोगे बहवो गुणा अपि निगदिताः। तद्यथा–

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।।

अत्र कः? इति प्रश्ने महाभाष्यकारो ब्रवीति वाग्योगविदेवेति। पुनः कुत एतत्? इत्याशङ्क्य प्रतिपादयति– 'यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा' इति।

वेदे व्याकरणस्य कीदृशं स्वरूपमिति विवृण्वता महाभाष्यकारेण भगवता पतञ्जलिनाऽग्रे व्याकरणस्य स्वरूपं प्रतिपादितम्। तद्यथा–

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्या आ विवेश।।[23]

इत्थं व्याकरणस्य स्वरूपं निर्दिश्योपर्युक्तस्य वचनस्य व्याख्यानमपि तत्रैव महर्षिणा पतञ्जलिना विहितम्। तद्यथा–

चत्वारि शृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः– त्रयः काला भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य–सप्त विभक्तयः। त्रिधा बद्धः–त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्? रौतिः शब्दकर्मा महो देवो मर्त्या आविवेशेति । महान् देवः शब्दः। मर्त्या मरणधर्म्माणो मनुष्यास्तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्य ध्येयं व्याकरणम्।[24]

श्रीमता भर्तृहरिणाऽपि महता देवेन सायुज्यस्य विषये वाक्यपदीये ब्रह्मकाण्डे इत्थं व्यलेखि–

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।[25]

पदमञ्जरीकारस्य हरदत्तस्याप्यत्रार्थे सम्मतिर्यथा–

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूत सर्वासां विद्यानां यदवस्थितम्।।
रूपान्तरेण ते देवा विचरन्ति महीतले।
ये व्याकरणसंस्कारपवित्रितमुखा नराः।।[26]

**सन्दर्भाः**

1. सिद्धहेमचन्द्रानुशासनस्य प्रथमाध्यायः, पृ. 7
2. वाक्यपदीयं ब्रम्हका, कारिका 13
3. पात, म.भा. 6..74
4. पात.म.भा. पस्पशा.
5. वाक्यपदीयं ब्रम्हका, कारिका 141
6. पात.म.भा. पस्पशा,
7. पात.म.भा. पस्पशा, 3.2.3
8. वाक्यपदीयं , ब्रम्हाका., कारिका 141
9. ऋक्तन्त्रम्, 1.4
10. महाभारत शा.प. 323.24
11. तैत्ति. संहि,, 6.4.7
12. ऋग्भाष्यस्योपोद्घातः पूनासंस्क, भा. 1, पृ. 26
13. पात.म. भा. 1.1.1
14. पात. म. भा. , 6.1.77
15. काशिकावृत्ति, 4.2.74
16. मन्त्रार्थानुक्रमणी–ऋग्भाष्यम् 7.1
17. शाकलप्रातिशाख्यस्य चतुद्रशाध्यायस्यान्ते,
18. पाणिनिशिक्षा, कारिका, 41–42
19. वापदेवकृतकविकल्पदुमग्रन्थारम्भे,
20. पात.म.भा. पस्पशा.
21. पात. म. भा., पस्पशा.
22. पात. म. भा., पस्पशा.
23. ऋग्वेदे, 4.78.31
24. पात. म. भा., पस्पशा.
25. वाक्यपदीयं ब्रह्मकाण्डम्, कारिका., 130, 131
26. पदमंजरी– 'अथ शब्दानुशासनम्' इत्यस्य व्याख्यानान्ते।